Amritanilayam Stotras

3.3 - ????? ????????????????? - ????? ???????? ????????? ?????? ????

कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया -
न्तृतीयकाण्डे तृतीयः प्रश्नः –
वैकृतविधीनामभिधानं

ओ -न्नमः परमात्मने , श्री महागणपतये नमः ,
श्री गुरुभ्यो नमः । ह॒रि॒ः ओम् ॥

अग्ने॑ तेजस्वि -न्तेज॒स्वी त्व -न्दे॒वेषु॑
भूया॒स्तेज॑स्वन्त॒ -म्मामायु॑ष्मन्तं॒ -
वँर्च॑स्वन्त -म्मनु॒ष्ये॑षु कुरु दी॒क्षायै॑ च
त्वा॒ तप॑सश्च॒ तेज॑से जुहोमि तेजो॒विद॑सि॒
तेजो॑ मा॒ मा हा॑सी॒न्मा -ऽह -न्तेजो॑ हासिष॒ -म्मा
मा -न्तेजो॑ हासी॒दिन्द्रौ॑जस्विन्नोज॒स्वी त्व -
न्दे॒वेषु॑ भूया॒ ओज॑स्वन्त॒ -
म्मामायु॑ष्मन्तं॒ -वँर्च॑स्वन्त -म्मनु॒ष्ये॑षु
कुरु॒ ब्रह्म॑णश्च त्वा क्ष॒त्रस्य॒ चौ - [
क्ष॒त्रस्य॒ च , ओज॑से जुहोम्योजो॒वि -] 1

-ज॑से जुहोम्योजो॒वि -द॒स्योजो॑ मा॒ मा
हा॑सी॒न्मा -ऽहमोजो॑ हासिष॒ -म्मा मामोजो॑ हासी॒ -
थ्सूर्य॑ भ्राजस्वि -न्भ्राज॒स्वी त्व -
न्दे॒वेषु॑ भूया॒ भ्राज॑स्वन्त॒ -
म्मामायु॑ष्मन्तं॒ -वँर्च॑स्वन्त -म्मनु॒ष्ये॑षु
कुरु वा॒योश्च॑ त्वा॒ -ऽपाञ्च॒ भ्राज॑से
जुहोमिसुव॒र्विद॑सि॒ सुव॑र्मा॒ मा हा॑सी॒न्मा -
ऽहग्ं सुव॑र् हासिष॒ -म्मा माग्ं सुव॑र् हासी॒ -
न्मयि॑ मे॒धा -म्मयि॑ प्र॒जा -म्मय्य॒ग्निस्तेजो॑
दधातु॒ मयि॑ मे॒धा -म्मयि॑ प्र॒जा -म्मयीन्द्र॑
इन्द्रि॒य -न्द॑धातु॒ मयि॑ मे॒धा -म्मयि॑ प्र॒जा -
म्मयि॒ सूर्यो॒ भ्राजो॑ दधातु ॥ 2 ॥
(क्ष॒त्रस्य॑ च॒ – मयि॒ – त्रयो॑विग्ंशतिश्च) (अ . 1)

वा॒युर् हि॑कं॒र्ता -ऽग्निः प्र॑स्तो॒ता
प्र॒जाप॑ति॒ -स्साम॒ बृह॒स्पति॑रुद्गा॒ता
विश्वे॑ दे॒वा उ॑पगा॒तारो॑ म॒रुतः॑
प्रतिह॒र्तार॒ इन्द्रो॑ नि॒धन॒न्ते दे॒वाः
प्रा॑ण॒भृतः॑ प्रा॒ण -म्मयि॑ दधत्वे॒तद्वै
सर्व॑मद्ध्व॒र्यु -
रु॑पाकु॒र्वन्नु॑द्गा॒तृभ्य॑ उ॒पाक॑रोति॒ ते
दे॒वाः प्रा॑ण॒भृतः॑ प्रा॒ण -म्मयि॑
दध॒त्वित्या॑है॒तदे॒व सव॑र्मा॒त्म -न्ध॑त्त॒
इडा॑ देव॒हू र्मनु॑ -र्यज्ञ॒नी -
र्बृह॒स्पति॑रुक्थाम॒दानि॑ शग्ंसिष॒ -द्विश्वे॑
दे॒वा - [दे॒वाः , सू॒क्त॒वाचः॒ पृथि॑वि] 3

-स्सू᳚क्त॒वाचः॒ पृथि॑वि मात॒र्मा मा॑हिग्ंसी॒
र्मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒ मधु॑वक्ष्यामि॒
मधु॑वदिष्यामि॒ मधु॑मती -न्दे॒वेभ्यो॒
वाच॑मुद्यासग्ं शुश्रू॒षेण्या᳚ -
म्मनु॒ष्ये᳚भ्य॒स्त -म्मा॑ दे॒वा अ॑वन्तु
शो॒भायै॑ पि॒तरो -ऽनु॑ मदन्तु ॥ 4 ॥
(श॒ग्ं॒सि॒ष॒ -द्विश्वे॑ दे॒वा –
अ॒ष्टाविग्ं॑शतिश्च) (अ. 2)

वस॑वस्त्वा॒ प्रव॑हन्तु गाय॒त्रेण॒ छन्द॑सा॒ - ऽग्नेः प्रि॒य -म्पाथ॒ उपे॑हि रु॒द्रास्त्वा॒
प्रवृ॑हन्तु॒ त्रैष्टु॑भेन॒ छन्द॒सेन्द्र॑स्य
प्रि॒य -म्पाथ॒ उपे᳚ह्यादि॒त्यास्त्वा॒
प्रवृ॑हन्तु॒ जाग॑तेन॒ छन्द॑सा॒ विश्वे॑षा -
न्दे॒वाना᳚ -म्प्रि॒य -म्पाथ॒ उपे॑हि॒ मान्दा॑सु
ते शुक्र शु॒क्रमा धू॑नोमि भ॒न्दना॑सु॒
कोत॑नासु॒ नूत॑नासु॒ रेशी॑षु॒ मेषी॑षु॒ वाशी॑षु
विश्व॒भृथ्सु॒ माद्ध्वी॑षु ककु॒हासु॒
शक्व॑रीषु [ ] 5

शु॒क्रासु॑ ते शुक्र शु॒क्रमा धू॑नोमि शु॒क्र -
न्ते॑ शु॒क्रेण॑ गृह्णा॒म्यह्नो॑ रू॒पेण॒
सूर्य॑स्य र॒श्मिभिः॑ ॥ आ -ऽस्मि॑न्नु॒ग्रा
अ॑चुच्यवुर्दि॒वो धारा॑ असश्चत ॥ क॒कु॒हग्ं
रू॒पं -वृँ॑ष॒भस्य॑ रोचते बृ॒ह -थ्सोम॒ -स्सोम॑स्य
पुरो॒गा -श्शु॒क्र -श्शु॒क्रस्य॑ पुरो॒गाः ॥ य -
त्ते॑ सो॒मादा᳚भ्य॒ -न्नाम॒ जागृ॑वि॒ तस्मै॑ ते
सोम॒ सोमा॑य॒ स्वाहो॒शि -क्त्व -न्दे॑व सोम

गाय॒त्रेण॒ छन्द॑सा॒ -ऽग्नेः [छन्द॑सा॒ -ऽग्नेः , प्रि॒य -म्पाथो॒] 6

प्रि॒य -म्पाथो॒ अपी॑हि व॒शी त्व -न्दे॑व सोम॒ त्रैष्टु॑भेन॒ छन्द॒सेन्द्र॑स्य प्रि॒य -म्पाथो॒ अपी᳚ह्य॒स्मथ्स॑खा॒ त्व -न्दे॑व सोम॒ जाग॑तेन॒ छन्द॑सा॒ विश्वे॑षा -न्दे॒वाना ᳚ -म्प्रि॒य -म्पाथो॒ अपी॒ह्या न॑ः प्रा॒ण ए॑तु परा॒वत॒ आ -ऽन्तरि॑क्षाद्दि॒वस्परि॑ । आयु॑ः पृथि॒व्या अद्ध्य॒मृत॑मसि प्रा॒णाय॑ त्वा ॥ इ॒न्द्रा॒ग्नी मे॒ वर्च॑ः कृणुता॒ं -वँर्च॒ -स्सोमो॒ बृह॒स्पति॑ः । वर्चो॑ मे॒ विश्वे॑दे॒वा वर्चो॑ मे धत्तमश्विना ॥ द॒धु॒न्वे वा॒ यदी॒मनु॒ वोच॒द्ब्रह्मा॑णि॒ वेरु॒ तत् । परि॒ विश्वा॑नि॒ काव्या॑ ने॒मिश्च॒क्रमि॑वा भवत् ॥ 7 ॥

(शक्व॑रीष्व॒ **–** ग्ने **–** बृ॑ह॒स्पति॒ः **–** पञ्च॑विग्ं॒शतिश्च **) (**अ **. 3)**

ए॒तद्वा अ॒पा -न्ना॑म॒धेय॒ -ङ्गु॒ह्य॑ं -यँदा॑धा॒वा मान्दा॑सु ते शुक्र शु॒क्रमा धू॑नो॒मीत्या॑हा॒पामे॒व ना॑म॒धेये॑न॒ गुह्ये॑न दि॒वो वृष्टि॒मव॑ रुन्धे शु॒क्र -न्ते॑ शु॒क्रेण॑ गृह्णा॒मीत्या॑है॒तद्वा अह्नो॑ रू॒पं -यँद्रात्रि॒ -स्सूर्य॑स्य र॒श्मयो॒ वृष्ट्या॑ ईश॒ते -ऽह्न॑ ए॒व रू॒पेण॒ सूर्य॑स्य र॒श्मिभि॑र्दि॒वो वृष्टि॑ं -ञ्च्यावय॒त्या -ऽस्मि॑न्नु॒ग्रा [-ऽस्मि॑न्नु॒ग्राः , अ॒चु॒च्य॒वु॒रित्या॑ह] 8

अ॑चुच्यवु॒रित्या॑ह यथाय॒जुरे॒वैत -त्क॑कु॒हग्ं रू॒पं -वृँ॑ष॒भस्य॑ रोचते बृ॒हदित्या॑है॒तद्वा अ॑स्य ककु॒हग्ं रू॒पं -यँ -द्वृष्टी॑ रू॒पेणै॒व वृष्टि॒मव॑ रुन्धे॒ यत्ते॑ सो॒मादा᳚भ्य॒ -न्नाम॒ जागृ॒वीत्या॑है॒ष ह॒ वै ह॒विषा॑ ह॒विर्य॑जति॒ यो -ऽदा᳚भ्य -ङ्गृही॒त्वा सोमा॑य जु॒होति॒परा॒ वा ए॒तस्या -ऽऽयु॑ः प्रा॒ण ए॑ति॒ [प्रा॒ण ए॑ति , यो -ऽग्ं॑शु -] 9

यो -ऽग्ं॑शु -ङ्गृ॒ह्णात्या न॑ः प्रा॒ण ए॑तु परा॒वत॒ इत्या॒हा -ऽऽयु॑रे॒व प्रा॒णमा॒त्म -न्ध॑त्ते॒ ऽमृत॑मसि प्रा॒णाय॒ त्वेति॒

हिर॑ण्यम॒भि व्य॑नित्य॒मृतं॒ -वैँ
हिर॑ण्य॒मायुः॑ प्रा॒णो॑ -ऽमृते॑नै॒वा -
ऽऽयु॑रा॒त्म -न्ध॑त्ते श॒तमा॑न -म्भवति श॒तायुः॒
पुरु॑ष -श्श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये
प्रति॑तिष्ठत्य॒प उप॑ स्पृशति भेष॒जं -वाँ आपो॑
भेष॒जमे॒व कु॑रुते ॥ 10 ॥
(उ॒ग्रा – ए॒त्या – प॒ – स्त्रीणि॑ च) (अ. 4)

वा॒युर॑सि प्रा॒णो नाम॑ सवि॒तुराधि॑पत्ये -ऽपा॒न -
म्मे॑ दा॒श्चक्षु॑रसि॒ श्रोत्र॒ -न्नाम॑
धा॒तुराधि॑पत्य॒ आयु॑र्मे दा रू॒पम॑सि॒ वर्णो॒
नाम॒ बृह॒स्पते॒राधि॑पत्ये प्र॒जा -म्मे॑ दा
ऋ॒तम॑सि स॒त्य -न्नामेन्द्र॒स्या -ऽऽधि॑पत्ये
क्ष॒त्र -म्मे॑ दा भू॒तम॑सि॒ भव्य॒ -न्नाम॑
पितृ॒णामाधि॑पत्ये॒ -ऽपा -मोष॑धीना॒ -ङ्गर्भ॑ -न्धा
ऋ॒तस्य॑ त्वा॒ व्यो॑मन ऋ॒तस्य॑ [ ] 11

त्वा॒ विभू॑मन ऋ॒तस्य॑ त्वा॒ विध॑र्मण ऋ॒तस्य॑
त्वा स॒त्याय॒र्तस्य॑ त्वा॒ ज्योति॑षे
प्र॒जाप॑ति र्वि॒राज॑मपश्य॒ -त्तया॑ भू॒त -ञ्च॒
भव्य॑ -ञ्चा सृजत॒ तामृषि॑भ्यस्ति॒रो॑ -ऽदधा॒ -त्ता
-ञ्ज॒मद॑ग्नि॒स्तप॑सा -ऽ पश्य॒ -त्तया॒ वै स
पृश्ञी॒न् कामा॑नसृजत॒ त -त्पृश्ञी॑ना -
म्पृश्ञि॒त्वं -यँ -त्पृश्ञ॑यो गृ॒ह्यन्ते॒
पृश्ञी॑ने॒व तैः कामा॒न्॒ . यज॑मा॒नो -ऽव॑ रुन्धे
वा॒युर॑सि प्रा॒णो [वा॒युर॑सि प्रा॒णः ,
नामेत्या॑ह] 12

नामेत्या॑ह प्राणापा॒नावे॒वाव॑ रुन्धे॒
चक्षु॑रसि॒ श्रोत्र॒ -न्नामेत्या॒हा -
ऽऽयु॑रे॒वाव॑ रुन्धे रू॒पम॑सि॒ वर्णो॒
नामेत्या॑ह प्र॒जामे॒वाव॑ रुन्धऋ॒तम॑सि स॒त्य -
न्नामेत्या॑ह क्ष॒त्रमे॒वाव॑ रुन्धे भू॒तम॑सि॒
भव्य॒ -न्नामेत्या॑ह प॒शवो॒ वा अ॒पामोष॑धीना॒ -
ङ्गर्भः॑ प॒शूने॒वा - [प॒शूने॒व , अव॑ रुन्ध] 13

-व॑ रुन्ध ए॒ताव॒द्वै पुरु॑ष -म्प॒रित॒स्तदे॒वाव॑
रुन्ध ऋ॒तस्य॑ त्वा॒ व्यो॑मन॒ इत्या॑हे॒यं -वाँ
ऋ॒तस्य॒ व्यो॑मे॒मामे॒वाभि ज॑यत्यृ॒तस्य॑
त्वा॒ विभू॑मन॒ इत्या॑हा॒ -ऽन्तरि॑क्षं॒ -वाँ
ऋ॒तस्य॒ विभू॑मा॒न्तरि॑क्षमे॒वाभि

ज॑यत्यृ॒तस्य॑ त्वा॒ विध॑र्मण॒ इत्या॑ह॒
द्यौर्वा ऋ॒तस्य॒ विध॑र्म॒ दिव॑मे॒वाभि
ज॑यत्यृ॒तस्य॑ [ज॑यत्यृ॒तस्य॑ , त्वा॒
स॒त्यायेत्या॑ह॒] 14

त्वा स॒त्यायेत्या॑ह॒ दिशो॒ वा ऋ॒तस्य॑ स॒त्य -
न्दिश॑ ए॒वाभि ज॑यत्यृ॒तस्य॑ त्वा॒ ज्योति॑ष॒
इत्या॑ह सुव॒र्गो वै लो॒क ऋ॒तस्य॒ ज्योति॑ -
स्सुव॒र्गमे॒व लो॒कम॒भि ज॑यत्ये॒ताव॑न्तो॒ वै
दे॑वलो॒कास्ताने॒वाभि ज॑यति॒ दश॒
सम्प॑द्यन्ते॒ दशा᳚क्षरा वि॒राडन्नं॑ -विँ॒रा -
ड्वि॒राज्ये॒वान्नाद्ये॒ प्रति॑तिष्ठति ॥ 15 ॥
(व्यो॑मन ऋ॒तस्य॑ – प्रा॒णः – प॒शुने॒व –
विध॑र्म॒ दिव॑मे॒वाभि ज॑यत्यृ॒तस्य॒ -
षट्च॑त्वारिग्ंशच्च) (अ. 5)

दे॒वा वै य -द्य॒ज्ञेन॒ नावारु॑न्धत॒ त -
त्परै॒रवा॑रुन्धत॒ त -त्परा॑णा -म्पर॒त्वं -यँ -
त्परे॑ गृ॒ह्यन्ते॒ यदे॒व य॒ज्ञेन॒नाव॑रु॒न्धे
तस्याव॑रुद्ध्यै॒ य -म्प्र॑थ॒म -
ङ्गृ॒ह्णाती॒ममे॒व तेन॑ लो॒कम॒भि ज॑यति॒य -
न्द्वि॒तीय॑म॒न्तरि॑क्ष॒ -न्तेन॒ य -
न्तृ॒तीय॑म॒मुमे॒व तेन॑ लो॒कम॒भि ज॑यति॒ यदे॒ते
गृ॒ह्यन्त॑ ए॒षां लोँ॒काना॑ -म॒भिजि॑त्या॒ [-
म॒भिजि॑त्या , उत्त॑रे॒ष्वह -] 16

उत्त॑रे॒ष्वह॑ -स्स्व॒मुतो॒ -ऽर्वाञ्चो॑
गृह्यन्ते ऽभि॒जित्यै॒वेमां -लोँ॒का -
न्पुन॑रि॒मं -लोँ॒क -म्प्र॒त्यव॑रोहन्ति॒ य -
त्पूर्वे॒ष्वह॑ -स्स्वि॒तः परा᳚ञ्चो
गृ॒ह्यन्ते॒ तस्मा॑दि॒तः परा᳚ञ्च इ॒मे लो॒का
यदुत्त॑रे॒ष्वह॑ -स्स्व॒मुतो॒ -ऽर्वाञ्चो॑
गृ॒ह्यन्ते॒ तस्मा॑द॒मुतो॒ ऽर्वाञ्च॑ इ॒मे
लो॒कास्तस्मा॒दया॑तयाम्नो लो॒का -न्म॑नु॒ष्या॑
उप॑ जीवन्ति ब्रह्मवा॒दिनो॑ वदन्ति॒ कस्मा᳚ -
थ्स॒त्याद॒द्भ्य ओष॑धय॒ -स्स -म्भ॑व॒न्त्योष॑धयो [
ओष॑धय॒ -स्स -म्भ॑व॒न्त्योष॑धयः ,
म॒नु॒ष्या॑णा॒मन्न॑ -] 17

मनु॒ष्या॑णा॒मन्न॑ -म्प्र॒जाप॑ति -म्प्र॒जा अनु॒
प्रजा॑यन्त॒ इति॒ परा॒नन्विति॑ ब्रूया॒ -द्य -

द्गृ॒ह्णात्य॒द्भ्यस्त्वौष॑धीभ्यो
गृह्णा॒मीति॒ तस्मा॑द॒द्भ्य ओष॑धय॒ -
स्सम्भ॑वन्ति॒ य -द्गृ॒ह्णात्योष॑धीभ्यस्त्वा
प्र॒जाभ्यो॑ गृह्णा॒मीति॒ तस्मा॒दोष॑धयो
मनु॒ष्या॑णा॒मन्नं॒ -यँ -द्गृ॒ह्णाति॑
प्र॒जाभ्य॑स्त्वा प्र॒जाप॑तये गृह्णा॒मीति॒
तस्मा᳚ -त्प्र॒जाप॑ति -म्प्र॒जा अनु॒ प्रजा॑यन्ते
॥ 18 ॥
(अ॒भिजि॑त्यै – भव॒न्त्योष॑धयो॒ – ऽष्टा
च॑त्वारिग्ंशच्च) (अ. 6)

प्र॒जाप॑तिर्देवासु॒रान॑ सृजत॒ तदनु॑ य॒ज्ञो॑ -
ऽसृज्यत य॒ज्ञ -ञ्छन्दाग्ं॑सि॒ ते विष्व॑ञ्चो॒
व्य॑क्राम॒न् -थ्सो -ऽसु॑रा॒ननु॑ य॒ज्ञो -
ऽपा᳚क्राम -द्य॒ज्ञ -ञ्छन्दाग्ं॑सि॒ ते दे॒वा
अ॑मन्यन्ता॒मी वा इ॒दम॑भूव॒न्॒ . य -द्व॒यग्ग् स्म
इति॒ ते प्र॒जाप॑ति॒मुपा॑ -ऽधाव॒न् -थ्सो᳚ -
ऽब्रवीत् -प्र॒जाप॑ति॒श्छन्द॑सां -
वीँ॒र्य॑मा॒दाय॒ तद्वः॒ प्र दा᳚स्या॒मीति॒ स
छन्द॑सां -वीँ॒र्य॑ - [छन्द॑सां -वीँ॒र्य᳚म् , आ॒दाय॒
तदे᳚भ्यः॒] 19

-मा॒दाय॒ तदे᳚भ्यः॒ प्राय॑च्छ॒ -त्तदनु॒
छन्दा॒ग्॒स्यपा᳚ -ऽक्राम॒न् छन्दाग्ं॑सि
य॒ज्ञस्ततो॑ दे॒वा अभ॑व॒ -न्परा -ऽसु॑रा॒ य ए॒व -
ञ्छन्द॑सां -वीँ॒र्यं॑ -वेँदा -ऽऽ श्रा॑व॒या -ऽस्तु॒
श्रौष॒ड् यज॒ ये यजा॑महे वषट्का॒रो
भव॑त्या॒त्मना॒ परा᳚ -ऽस्य॒ भ्रातृ॑व्यो भवति
ब्रह्मवा॒दिनो॑ वदन्ति॒ कस्मै॒
कम॑द्ध्व॒र्युरा श्रा॑वय॒तीति॒ छन्द॑सां -
वीँ॒र्या॑येति॑ ब्रूयादे॒ त -द्वै [ ] 20

छन्द॑सां -वीँ॒र्य॑मा श्रा॑व॒या -ऽस्तु॒ श्रौष॒ड्
यज॒ ये यजा॑महे वषट्का॒रो य ए॒वं -वेँद॒
सवी᳚र्यैरे॒व छन्दो॑भिरर्चति॒ य -त्कि -
ञ्चार्च॑ति॒ यदिन्द्रो॑ वृ॒त्रमह॑न्न -मे॒द्ध्य -
न्त -द्य -द्यती॑न॒पाव॑पद -मे॒द्ध्य -न्तदथ॒
कस्मा॑दै॒न्द्रो य॒ज्ञ आ सग्ग्
स्था॑तो॒रित्या॑हु॒रिन्द्र॑स्य॒ वा ए॒षा
य॒ज्ञिया॑ त॒नूर्य -द्य॒ज्ञस्तामे॒व त
द्य॑जन्ति॒ य ए॒वं -वेँदोपै॑नं -यँ॒ज्ञो न॑मति ॥ 21 ॥

(छन्द॑सां -वीँ॒र्यं॑ – वाँ – ए॒व त – द॒ष्टौ च॑) (अ.
7)

आ॒युर्दा अ॑ग्ने ह॒विषो॑ जुषा॒णो घृ॒तप्र॑तीको
घृ॒तयो॑निरेधि । घृ॒त -म्पी॒त्वा मधु॒चारु॒ गव्य॑
-म्पि॒तेव॑पु॒त्रम॒भि र॑क्षतादि॒मम् ॥ आ
वृ॑श्च्यते॒ वा ए॒त -द्यज॑मानो॒ -ऽग्निभ्यां॒ -
यँदे॑नयो -श्शृत॒ -ङ्कृत्याथा॒ -ऽन्यत्रा॑ -
वभृ॒थम॒वैत्या॑यु॒र्दा अ॑ग्ने ह॒विषो॑ जुषा॒ण
इत्य॑वभृ॒थम॑वै॒ष्यन्
जु॑हुया॒दाहु॑त्यै॒वैनौ॑ शमयति॒ ना -
ऽऽर्ति॒मार्च्छ॑ति॒ यज॑मानो॒ य -त्कुसी॑द॒ - [य -
त्कुसी॑दम् , अप्र॑तीत्त॒ -म्मयि॒ येन॑] 22

-मप्र॑तीत्त॒ -म्मयि॒ येन॑ य॒मस्य॑ ब॒लिना॒
चरा॑मि । इ॒हैव स -न्नि॒रव॑दये॒ तदे॒त -त्तद॑ग्ने
अनृ॒णो भ॑वामि । विश्व॑लोप विश्वदा॒वस्य॑ त्वा॒
ऽऽसञ्जु॑होम्य॒ग्धादेको॑ ऽहु॒तादेक॑ -
स्समस॒नादेकः॑ । तेनः॑ कृण्वन्तु भेष॒जग्ं सद॒ -
स्सहो॒ वरे᳚ण्यम् ॥ अ॒य -न्नो॒ नभ॑सा पु॒र -
स्स॒ग्ग्॒स्फानो॑ अ॒भि र॑क्षतु ।
गृ॒हाणा॒मस॑मर्त्यै ब॒हवो॑ नो गृ॒हा अ॑सन्न् ॥ स
त्वन्नो॑ [स त्वन्नः॑ , न॒भ॒स॒स्प॒त॒ ऊर्ज॑ -न्नो] 23

नभसस्पत॒ ऊर्ज॑ -न्नो धेहि भ॒द्रया᳚ । पुन॑र्नो
न॒ष्टमा कृ॑धि॒ पुन॑र्नो र॒यिमा कृ॑धि ॥ देव॑
सग्ग् स्फान सहस्रपो॒षस्ये॑शिषे॒ स नो॑ रा॒स्वा -
ऽज्या॑निग्ं रा॒यस्पोषग्ं॑ सु॒वीर्यग्ं॑ सं
वँथ्स॒रीणाग्॑ स्व॒स्तिम् ॥ अ॒ग्निर्वाव य॒म
इ॒यं -यँ॒मी कुसी॑दं॒ -वाँ ए॒त -द्य॒मस्य॒ यज॑मान॒ आ
द॑त्ते॒ यदोष॑धीभि॒र्वेदिग्ग्॑ स्तृ॒णाति॒
यदनु॑पौष्य प्रया॒या -द्ग्री॑वब॒द्धमे॑न - [-
द्ग्री॑वब॒द्धमे॑नम् , अ॒मुष्मि॑ -ल्लोँ॒के] 24

-म॒मुष्मि॑ -ल्लोँ॒के ने॑नीयेर॒न्॒ . य -
त्कुसी॑द॒मप्र॑तीत्त॒ -म्मयीत्युपौ॑षती॒हैव सन्
. य॒म -ङ्कुसी॑द -न्निरव॒दाया॑नृ॒ण -स्सु॑व॒र्गं -
लोँ॒कमे॑ति॒यदि॑ मि॒श्रमि॑व॒ चरे॑दञ्ज॒लिना॒
सक्तू᳚ -न्प्रदा॒व्ये॑ जुहुयादे॒ष वा
अ॒ग्निर्वै᳚श्वान॒रो य -त्प्र॑दा॒व्य॑ -स्स
ए॒वैनग्ग्॑स्वदय॒त्यह्नां᳚ -विँ॒धान्या॑ -

मेकाष्ट॒काया॑मपू॒प -ञ्चतु॑ -श्शराव -म्प॒क्त्वा
प्रा॒तरे॒तेन॒ कक्ष॒ -मुपौ॑षे॒द्यदि॒ [-
मुपौ॑षे॒द्यदि॑ , दह॑ति] 25

दह॑ति पुण्य॒सम॑ -म्भवति॒ यदि॒ न दह॑ति
पाप॒सम॑मे॒तेन॑ हस्म॒ वा ऋष॑यः पु॒रा
वि॒ज्ञाने॑न दीर्घस॒त्रमुप॑ यन्ति॒ यो वा
उ॑पद्र॒ष्टार॑मुप -श्रो॒तार॑मनुख्या॒तारं॑ -
विँ॒द्वान् . यज॑ते॒ सम॒मुष्मि॑ -ल्लोँ॒क
इ॑ष्टापू॒र्तेन॑ गच्छते॒ -ऽग्निर्वा
उ॑पद्र॒ष्टा वा॒युरु॑पश्रो॒ता ऽऽदि॒त्यो॑ -
ऽनुख्या॒ता तान्. य ए॒वं -विँ॒द्वान् . यज॑ते॒
सम॒मुष्मि॑ -ल्लोँ॒क इ॑ष्टापू॒र्तेन॑ गच्छते॒ ऽय -
न्नो॒ नभ॑सा पु॒र [पु॒रः , इत्या॑हा॒ग्निर्वै] 26

इत्या॑हा॒ग्निर्वै नभ॑सा पु॒रो᳚ -ऽग्निमे॒व
तदा॑है॒तन्मे॑ गोपा॒येति॒ स त्व -न्नो॑ नभसस्पत॒
इत्या॑ह वा॒युर्वै नभ॑स॒स्पति॑र्वा॒युमे॒व
तदा॑है॒तन्मे॑ गोपा॒येति॒ देव॑ सग्ग्
स्फा॒नेत्या॑हा॒ -ऽसौ वा आ॑दि॒त्यो दे॒व -
स्स॒ग्ग्॒स्फान॑ आदि॒त्यमे॒व तदा॑है॒तन्मे॑
गोपा॒येति॑ ॥ 27 ॥
(कुसी॑दं॒ – त्व -न्न॑ – एन – मोषे॒द्यदि॑ – पु॒र –
आ॑दि॒त्यमे॒व तदा॑है॒तन्मे॑ गोपा॒येति॑) (अ. 8)

ए॒तं -युँवा॑न॒ -म्परि॑ वो ददामि॒ तेन॒
क्रीड॑न्तीश्चरत प्रि॒येण॑ । मा न॑ -श्शाप्त
ज॒नुषा॑ सुभागा रा॒यस्पोषे॑ण॒ समि॒षा म॑देम ॥
नमो॑ महि॒म्न उ॒त चक्षु॑षे ते॒ मरु॑ता -
म्पित॒स्तद॒ह -ङ्गृ॑णामि । अनु॑ मन्यस्व सु॒यजा॑
यजाम॒ जुष्ट॑ -न्दे॒वाना॑मि॒दम॑स्तु ह॒व्यम् ॥
दे॒वाना॑मे॒ष उ॑पना॒ह आ॑सीद॒पा -ङ्गर्भ॒
ओष॑धीषु॒ न्य॑क्तः । सोम॑स्य द्र॒फ्सम॑वृणीत
पू॒षा [ ] 28

बृ॒हन्नद्रि॑रभव॒ -त्तदे॑षाम् ॥ पि॒ता व॒थ्साना॒ -
म्पति॑रघ्नि॒याना॒मथो॑ पि॒ता म॑ह॒ता -
ङ्गर्ग॑राणाम् । व॒थ्सो ज॒रायु॑ प्रति॒धु -
क्पी॒यूष॑ आ॒मिक्षा॒ मस्तु॑ घृ॒तम॑स्य॒ रेतः॑ ॥
त्वा -ङ्गावो॑ -ऽवृणत रा॒ज्याय॒ त्वाग्ं ह॑वन्त
म॒रुत॑ -स्स्व॒र्काः । वर् ष्म॑न् क्ष॒त्रस्य॑

क॒कुभिं॑ शिश्रिया॒णस्ततो॑ न उ॒ग्रो वि भ॑जा॒
वसू॑नि ॥ व्यृ॑द्धेन॒ वा ए॒ष प॒शुना॑ यजते॒
यस्यै॒तानि॒ न क्रि॒यन्त॑ ए॒ष ह॒ त्वै समृ॑द्धेन
यजते॒ यस्यै॒तानि॑ क्रि॒यन्ते ᳚ ॥ 29 ॥
(पू॒षा – क्रि॒यन्त॑ ए॒षो ᳚ – ऽष्टौ च॑) (अ . 9)

सूर्यो॑ दे॒वो दि॑वि॒षद्भ्यो॑ धा॒ता क्ष॒त्राय॑
वा॒युः प्र॒जाभ्यः॑ । बृह॒स्पति॑स्त्वा
प्र॒जाप॑तये॒ ज्योति॑ष्मती -ञ्जुहोतु ॥
यस्या ᳚स्ते॒ हरि॑तो॒ गर्भो॑ -ऽथो॒ योनि॑र्
हिर॒ण्ययी ᳚ । अङ्गा॒न्यह्रु॑ता॒ यस्यै॒ ता -
न्दे॒वै -स्सम॑जीगमम् ॥ आ व॑र्तन वर्तय॒ नि
नि॑वर्तन व॒र्तयेन्द्र॑ नर्दबुद ।
भूम्या॒श्चत॑स्रः प्र॒दिश॒स्ताभि॒रा व॑र्तया॒
पुनः॑ ॥ वि ते॑ भिनद्मि तक॒री॑ -विँ॑योनि॒ -विँ॑
ग॑वी॒न्यौ ᳚ । वि [ ] 30

मा॒तर॑ञ्च पु॒त्र -ञ्च॒ वि गर्भ॑ -ञ्च ज॒रायु॑ च ॥
ब॒हिस्ते॑ अस्तु॒ बालिति॑ ॥ उ॒रु॒द्र॒प्सो
वि॒श्वरू॑प॒ इन्दु॒ः पव॑मानो॒ धीर॑ आनञ्ज॒
गर्भ ᳚म् ॥ एक॑पदी द्वि॒पदी ᳚ त्रि॒पदी॒
चतु॑ष्पदी॒ पञ्च॑पदी॒ षट्प॑दी
स॒प्तप॑द्य॒ष्टाप॑दी॒ भुव॒ना -ऽनु॑ प्रथता॒ग्
स्वाहा ᳚ ॥ म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं -य॒ँज्ञ -
म्मि॑मिक्षताम् । पि॒पृ॒तान्नो॒ भरी॑मभिः ॥ 31 ॥
(ग॒वि॒न्यौ॑ वि – चतु॑श्चत्वारिग्ंशच्च) (अ . 10)

इ॒दं -वाँ॑मा॒स्ये॑ ह॒विः
प्रि॒यमि॑न्द्राबृहस्पती । उ॒क्थ -म्मद॑श्च
शस्यते ॥ अ॒यं -वाँ॒ -म्परि॑ षिच्यते॒
सोम॑इन्द्राबृहस्पती । चारु॒र्मदा॑य पी॒तये ᳚ ॥
अ॒स्मे इ॑न्द्राबृहस्पती र॒यि -न्ध॑त्तग्
शत॒ग्विन ᳚म् । अश्वा॑वन्तग् सह॒स्रिण ᳚म् ॥
बृह॒स्पति॑र्न॒ः परि॑पातु
प॒श्चादु॒तोत्त॑रस्मा॒दध॑रादघा॒योः । इन्द्रः॑
पु॒रस्ता॑दु॒त म॑द्ध्य॒तो न॒ -स्सखा॒ सखि॑भ्यो॒
वरि॑वः कृणोतु ॥ वि ते॒ विष्व॒ग्वात॑जूतासो
अग्ने॒ भामा॑स - [अग्ने॒ भामा॑सः , शु॒चे॒
शुच॑यश्चरन्ति ।] 32

-श्शुचे॒ शुच॑यश्चरन्ति । तु॒वि॒म्र॒क्षासो॑
दि॒व्या नव॑ग्वा॒ वना॑ वनन्ति धृष॒ता रु॒जन्तः॑ ॥
त्वाम॑ग्ने॒ मानु॑षीरीडते॒ विशो॑ होत्रा॒विदं॒ -
विँवि॑चिग्ं रत्न॒धात॑मम् । गुहा॒ सन्तग्ं॑ सुभग
वि॒श्वद॑र् शत -न्तु विष्म॒णसग्ं॑ सु॒यज॑ -
ङ्घृत॒श्रिय᳚म् ॥ धा॒ता द॑दातु नो र॒यिमीशा॑नो॒
जग॑त॒स्पतिः॑ । स नः॑ पू॒र्णेन॑ वावनत् ॥ धा॒ता
प्र॒जाया॑ उ॒त रा॒य ई॑शे धा॒तेदं -विँश्व॒ -
म्भुव॑न -ञ्जजान । धा॒ता पु॒त्रं -यँज॑मानाय॒
दाता॒ [दाता᳚ , तस्मा॑] 33

तस्मा॑ उ ह॒व्य -ङ्घृ॒तव॑द्विधेम ॥ धा॒ता द॑दातु
नो र॒यि -म्प्राची᳚ -ञ्जी॒वातु॒मक्षि॑ताम् । व॒य -
न्दे॒वस्य॑ धीमहि सुम॒तिग्ं स॒त्यरा॑धसः ॥ धा॒ता
द॑दातु दा॒शुषे॒ वसू॑नि प्र॒जाका॑माय मी॒ढुषे॑
दुरो॒णे । तस्मै॑ दे॒वा अ॒मृता॒ -स्सं
व्यँ॑यन्तां॒ -विँश्वे॑ दे॒वासो॒ अदि॑ति -
स्स॒जोषाः᳚ ॥ अनु॑ नो॒ -ऽद्या -ऽनु॑मतिर्य॒ज्ञ -
न्दे॒वेषु॑ मन्यताम् । अ॒ग्निश्च॑ हव्य॒वाह॑नो॒
भव॑ता -न्दा॒शुषे॒ मयः॑ ॥ अन्विद॑नुमते॒ त्व - [
अन्विद॑नुमते॒ त्वम् , मन्या॑सै॒ शञ्च॑नः कृधि ।] 34

-म्मन्या॑सै॒ शञ्च॑नः कृधि । क्रत्वे॒ दक्षा॑य नो
हिनु॒ प्रण॒ आयूग्ं॑षि तारिषः ॥ अनु॑ मन्यता -
मनु॒मन्य॑माना प्र॒जाव॑न्तग्ं
र॒यिमक्षी॑यमाणम् । तस्यै॑ व॒यग्ं हेड॑सि॒ मा -
ऽपि॑ भूम॒ सा नो॑ दे॒वी सु॒हवा॒ शर्म॑ यच्छतु ॥
यस्या॑मि॒द -म्प्र॒दिशि॒ यद्वि॒रोच॒ते -ऽनु॑मति॒ -
म्प्रति॑ भूषन्त्या॒यवः॑ । यस्या॑ उ॒पस्थ॑
उ॒र्व॑न्तरि॑क्ष॒ग्ं॒ सा नो॑ दे॒वी सु॒हवा॒
शर्म॑ यच्छतु ॥ 35 ॥

रा॒काम॒हग्ं सु॒हवाग्ं॑ सुष्टु॒ती हु॑वे
शृ॒णोतु॑ न -स्सु॒भगा॒ बोध॑तु॒ त्मना᳚ ।
सीव्य॒त्वप॑ -स्सू॒च्या -ऽच्छि॑द्यमानया॒ ददा॑तु
वी॒रग्ं श॒तदा॑यमु॒क्थ्य᳚म् ॥ यास्ते॑ राके
सुम॒तय॑ -स्सु॒पेश॑सो॒ याभि॒र्ददा॑सि दा॒शुषे॒
वसू॑नि । ताभि॑र्नो अ॒द्य सु॒मना॑ उ॒पाग॑हि
सहस्रपो॒षग्ं सु॑भगे॒ ररा॑णा ॥ सिनी॑वालि॒ , या
सु॑पा॒णिः ॥ कु॒हूम॒हग्ं सु॒भगां᳚ -
विँद्म॒नाप॑सम॒स्मिन् . य॒ज्ञे सु॒हवा᳚ -

ञ्जोहवीमि । सा नो॑ ददातु॒ श्रव॑ण -म्पितृ॒णा - न्तस्या ᳚स्ते देवि ह॒विषां॑ विधेम ॥ कु॒हू - र्दे॒वाना॑म॒मृत॑स्य॒ पत्नी॒ हव्यां॑ नो अ॒स्य ह॒विष॑श्चिकेतु । स -न्दा॒शुषे॑ कि॒रतु॒ भूरि॑ वा॒मग्ं रा॒यस्पोषं॑ -ञ्चिकि॒तुषे॑ दधातु ॥ 36 ॥ (भामा॑सो॒ – दाता॒ – त्व – म॒न्तरि॑क्ष॒ग्ं॒ सा नो॑ दे॒वी सु॒हवा॒ शर्म॑ यच्छतु॒ -श्रव॑णं॒ - चतु॑र्विग्ंशतिश्च **) (**अ **. 11)**

(अग्ने॑ तेजस्विन् – वा॒यु – र्वसं॑वस्त् – वै॒तद्वा अ॒पां – वा॒ँयुर॑सि प्रा॒णो नाम॑ – दे॒वा वै यद्य॒ज्ञेन॒न – प्र॒जाप॑ति र्दे॑वासु॒रा – नायु॒र्दा – ए॒तं -युँवान॒ग्ं॒ – सूर्यो॑ दे॒व – इ॒दं -वा॒ँ – मेका॑दश)

(अग्ने॑ तेजस्विन् – वा॒युर॑सि॒ – छन्द॑सां - वी॒र्यँ॑ – मा॒तर॑ञ्च॒ – षट्त्रिग्ं॑शत्)

(अग्ने॑ तेजस्विग्ग् **,** श्चिकि॒तुषे॑ दधातु **)**

॥ हरिः॑ ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया - न्तृतीयकाण्डे तृतीयः प्रश्न -स्समाप्तः ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh.
Phone Number: +91 9493475515 | www.amritanilayam.org